CC-0. Digitized by eGangotri and MIDF- Delhi

तर्क संग्रह

८१

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥१॥ श्रीगणेशाय नमः ॥ श्रीराजराजेश्वराय नमः ॥ विश्वेश्वरं सांबमूर्तिं प्रणिपत्य
गुरुं ॥ टीकां शिशुहितां कुर्वे तर्कसंग्रहदीपिकां ॥१॥ चिकीर्षितस्य ग्रंथस्य निर्विघ्नपरि
समाप्त्यर्थं शिष्टाचारानुमितश्रुतिबोधितकर्तव्यताकं इष्टदेवतानमस्कारलक्षणं
मंगलं शिष्यशिक्षार्थं निबध्नन् चिकीर्षितं प्रतिजानीते ॥ निधायेति ॥ ननु मंगलस्य
समाप्तिसाधनत्वं नास्ति ॥ मंगले कृतेपि किरणावल्यादौ समाप्त्यदर्शनात् ॥ मंगला
भावेपि कादंबर्यादौ समाप्तिदर्शनात् ॥ अन्वयव्यतिरेकव्यभिचारादिति चेन्न ॥ शिष्टा
चारानुमितश्रुतेरेव प्रमाणत्वात् ॥ तथाहि ॥ मंगलं वेदबोधितकर्तव्यताकं ॥ अलौ
किकाऽविगीतशिष्टाचारविषयत्वात् ॥ दर्शादिवत् ॥ भोजनादौ व्यभिचारवारणाय
अलौकिकेति ॥ रात्रिश्राद्धादौ व्यभिचारवारणाय अविगीतेति ॥ शिष्टपदं स्पष्टार्थं ॥ न
कुर्यान्निष्फलं कर्मेति जलताडनादेरपि निषिद्धत्वात् ॥ तर्कसंग्रह इति ॥ त ॥१॥
र्क्यंते प्रतिपाद्यंते इति तर्काः ॥ द्रव्यादिपदार्थाः ॥ तेषां संग्रहः ॥ संक्षेपेण स्वरूपकथनं

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ननु सप्तान्यतमत्वं सप्तभिन्नभिन्नत्वमिति वक्तव्यं ।। एवं च सप्तभिन्नस्याप्रसिद्धत्वात् सप्तान्यतमत्वं कथ
क्रियत इत्यर्थः ।। कस्मै प्रयोजनायेत्यत आह ।। सुखबोधायेति ।। सुखेनानायासेन मिति चेन्न
बोधः पदार्थज्ञानं तस्मै इत्यर्थः ।। ननु बहुभिर्ग्रंथैर्भूयस्तु किमर्थमपूर्वग्रंथः क्रि ।। द्रव्यादि
यत इत्यत आह ।। बालानामिति ।। तेषां अतिविस्तृतत्वात् ।। बालानां बोधो न भवतीत्यर्थः ।। सप्तान्यत
ग्रहणधारणपटुर्बालः ।। न तु स्तनंधयः ।। किं कृत्वा क्रियत इत्यत आह ।। निधायेति ।। वि मत्वं द्रव्या
श्वेशं जगन्नियंतारं सांबशिवं हृदि निधाय नितरां स्थापयित्वेत्यर्थः ।। पदार्थान् विभज दिभेदस
ते ।। द्रव्येति ।। पदस्य अर्थः ।। पदार्थ इति व्युत्पत्त्याभिधेयत्वं पदार्थसामान्यलक्षणं ।। न प्तकानाश्र
नु विभागादेव सप्तत्वे लब्धे सप्तग्रहणं व्यर्थमिति चेन्न ।। अधिकसंख्याव्यवच्छेदार्थत्वा यत्वमित्य
त् ।। ननु अतिरिक्तः पदार्थः प्रमितो वा न वा ।। नाद्यः ।। प्रमितस्य निषेधायोगात् ।। नान्त्यः प्रतियोगि लम्
प्रमितिं विना निषेधानुपपत्तेरिति चेन्न ।। पदार्थत्वं द्रव्यादिसप्तान्यतमत्वव्याप्यमिति व्यव
च्छेदार्थत्वात् ।। एवमग्रेपि द्रष्टव्यं ।। द्रव्यं विभजते ।। तत्रेति ।। तत्र द्रव्यादिमध्ये द्रव्याण्येव नवेत्य
न्वयः ।। कानि तानीत्यत आह ।। पृथिव्या [illegible] विघमानत्वात्स्वपं नव इ

Jagannath Bhattarai Collection, Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥२॥ व्याप्तिः। तथाहि। नीलं तमश्चलतीति प्रतीतिबलात् नीलरूपाधारतया क्रिया
धारतया च द्रव्यत्वं तावत्सिद्धं ॥ तच्च तमसो नाकाशादिपंचकेऽन्तर्भावः रूपवत्त्वात्। अ
त एव न वायौ। सदागतिमत्त्वाभावाच्च। नापि तेजसि। भास्वररूपाभावात् उष्णस्पर्शाभा
वाच्च। नापि जले। शीतस्पर्शाभावात् नीलरूपाश्रयत्वाच्च। नापि पृथिव्यां। गंधाभावात्॥
स्पर्शरहितत्वाच्च। तस्मात्तमोऽष्टमद्रव्यमिति चेन्न। तमसस्तेजोऽभावरूपत्वात्। तथाहि॥
तमो हि न रूपवद्द्रव्यं। आलोकासहकृतचक्षुर्ग्राह्यत्वात्। आलोकाभाववत्। रूपिचाक्षुषप्र
मायामालोकस्य कारणत्वात्। तस्मात्प्रौढप्रकाशकतेजःसामान्याभावस्तमः। तच्च नी
लं तमश्चलतीति प्रत्ययो भ्रमः। अतो नव द्रव्याणीति सिद्धं। द्रव्यत्वजातिमत्त्वं गुणवत्त्वं वा
द्रव्यसामान्यलक्षणं। लक्ष्यैकदेशावृत्तित्वं अव्याप्तिः। यथा गोः कपिलत्वं। अलक्ष्यवृत्तित्वे
अतिव्याप्तिः। यथा गोः शृंगित्वं। लक्ष्यमात्रावर्तनं असंभवः। यथा गोरेकशफवत्त्वं। एतद्दूष ।२॥
णत्रयरहितो धर्मो लक्षणं। स एवासाधारणधर्म इत्युच्यते। लक्ष्यतावच्छेदकसमनियत

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

त्वेऽत्रसाधारणत्वं। व्यावर्त्तकस्यैव लक्षणत्वे व्यावृत्ताव्यभिधेयत्वादेरतिव्याप्तिः। वारणाय न
ञ्जिन्नत्वं धर्मविशेषणीयं। व्यवहारस्यापि लक्षणप्रयोजनत्वे नदेयं। व्यावृत्तेरपि व्यवहा
रसाधनत्वात्। ननु गुणत्वं न द्रव्यलक्षणं। आद्यक्षणे उत्पन्नविनष्टद्रव्ये वाव्याप्तिरिति चे
न्न। गुणसमानाधिकरणसत्ताभिन्नजातिमत्त्वस्य विवक्षितत्वात्। ननु एवमपि एकं द्र
पेरसात्पृथगिति व्यवहारात् रूपादेरतिव्याप्तिरिति चेन्न॥ एकार्थसमवायादेव तादृश
व्यवहारोपपत्तेः। गुणे गुणानंगीकारात्। गुणं विभजते रूपेति। द्रव्यकर्मभिन्नत्वे सति
सामान्यवान् गुणः। गुणत्वजातिमान्वा। ननु लघुत्वमृदुत्वकठिन[illegible]त्वादीनां विद्यमा
नत्वात् कथं चतुर्विंशतिर्गुणा इति चेन्न। लघुत्वस्य गुरुत्वाभावरूपत्वात्॥ मृदुत्व[illegible]
कठिनत्वयोः। अवयवसंयोगविशेषरूपत्वात्॥ कर्म विभजते॥ उत्क्षेपणेति। संयोगभिन्नत्वे
सति संयोगासमवायिकारणं कर्म। कर्मत्वजातिमद्वा॥ भ्रमणादीनामपि गमनेऽन्तर्भावात्
न पंचत्वविरोधः॥ सामान्यं विभजते परमिति [illegible]॥ अपरं न्यूनवृत्तिः॥ सामान्यादिच

Jagannath Bhattarai Collection, Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥३॥ नुष्टयेजातिर्नास्ति । विशेषं विभजते । नित्येति । पृथिव्यादिचतुष्टयस्य परमाणवः ॥ आकाशा
दिपंचकं नित्यद्रव्याणि । समवायस्य भेदो नास्तीत्याह । समवायस्त्विति । अभावं विभजते । प्राग
भाव इति । तत्र । उद्देशक्रमानुसारात्प्रथमं पृथिव्या लक्षणमाह । गंधवतीति । नाम्ना पदार्थसं
कीर्तनं उद्देशः । उद्देशक्रम एव सर्वत्रेच्छैव नियामिका ॥ ननु सुरभ्यसुरभ्यवयवारब्धे परस्पर
विरोधेन गंधानुत्पादादव्याप्तिः । न च तत्र गंधवत्त्वं नीरसत्वप्रसक्तिरिति वाच्यं । अवयवगंधस्यै
व प्रतीतिसंभवेन चित्रगंधानंगीकारात् । किंच । उत्पन्नविनष्टघटादावव्याप्तिरिति चेन्न ॥
अन्वयव्यतिरेकाभ्यां पृथिवी गंधस्यैव नञांगीकारात् । ननु तथापि कालस्य सर्वाधारत
या सर्वेषां लक्षणानां कालेऽतिव्याप्तिरिति चेन्न । सर्वाधारताप्रयोजकसंबंधभिन्नसंबंधे
न लक्षणमत्वस्य अभिमतत्वात् । पृथिवीं विभजते । सा द्विविधेति । नित्यत्वं ध्वंसाप्रतियोगि
त्वं । अनित्यत्वं ध्वंसप्रतियोगित्वं । प्रकारांतरेण विभजते । सा द्विविधेति पुनरिति । शरी ॥३॥
रमिति । आत्मनो भोगायतनं शरीरं । यदवच्छिन्न आत्मनि भोगो जायते तद्भोगायतनं

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सुखदुःखान्यतरसाक्षात्कारो भोगः। शरीरे नरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकार
णमनःसंयोगाश्रयत्वं। शरीरेंद्रियभिन्नो विषयः॥ एवं च गंधवत्त्वं। शरीरं पार्थिवशरीरं
गंधवदिंद्रियं पार्थिवेंद्रियं गंधवान्विषयः पार्थिवविषय इति तल्लक्षणं बोध्यं। पार्थिवश
रीरं दर्शयति। शरीरमिति। इंद्रियं दर्शयति। इंद्रियमिति। गंधग्राहकमिति प्रयोजनकथ
नं। घ्राणमिति संज्ञा। नासाग्रवर्तीत्याश्रयोक्तिः। एवमुत्तरोत्तरं ज्ञेयं। पार्थिवविषयं दर्शयति॥
मृत्पाषाणेति। अपां लक्षणमाह। शीतेति। उत्पन्नविनष्टजले अव्याप्तिवारणाय शीतस्प
र्शसमानाधिकरणद्रव्यत्वापरजातिमत्त्वं तात्पर्यं। शीतं शिलातलमित्यादौ जलसंबंधाद
व शीतस्पर्शभानमिति नातिव्याप्तिः। अन्यत्सर्वं पूर्ववरीत्या व्याख्येयं। तेजसो लक्षणमाह॥ उष्ण
स्पर्शवदिति॥ उष्णं जलमिति प्रतीतेस्तेजःसंबंधानुविधायित्वान्नातिव्याप्तिः॥ विषयं विभ
जते। भौममिति। ननु सुवर्णं पार्थिवं पीतत्वात् गुरुत्वात् हरिद्रादिवदिति चेन्न। असंनानलसं
योगे सति घृतादौ द्रवत्वदर्शनेन जलमध्यस्थघृते नाशादर्शनेन असति प्रतिबंधके पार्थि

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥४॥ नश्वरत्वनाशाग्निसंयोगयोः कार्यकारणभावावधारणात् । शुक्लवर्णस्य असंतानलसंयोगे स
ति अनुच्छिद्यमानद्रवत्वाधिकरणत्वेन पार्थिवत्वानुपपत्तेः । नस्मासीनद्रव्यद्रवत्वनाशप्रति
वंधकतया द्रवद्रव्यांतरसिद्धेर्नैमित्तिकद्रवत्वाधिकरणतया जलत्वानुपपत्तेः । रूपवत्त्वपा
वासाद्विभ्र अनेन भावाद्वत्तेजसत्वसिद्धिः । नस्य उष्णस्पर्शाभास्वररूपयोरुपष्टंभकपार्थि
वरूपस्पर्शाभ्यां प्रतिवंधाद्द्रनुपलब्धिः । नस्मात्सुवर्णं तैजसमिति । वायुं लक्षयति ॥ रूपरहि
त इति । आकाशादावतिव्याप्तिवारणाय स्पर्शवदिति घटादौ अतिव्याप्तिवारणाय रूपरहि
त इति । नन्वप्राणस्पर्शज्ञानेनभाव इत्यत आह । शरीरेति । सर्वेति । एक एव स्थानभेदात् प्राणापा
नशाद्वैर्व्यवह्रियत इत्यर्थः । स्पर्शानुमेयो वायुः । तथाहि । योऽयं वायौ नातिशीतानुष्णाशीत
स्पर्शोभासते संस्पर्शः क्वचिदाश्रितः । गुणत्वात् रूपवत् ॥ नचास्य पृथिव्याश्रयः । उद्भूत
स्पर्शवत्पार्थिवस्य उद्भूतरूपवत्त्वनियमात् । नजलतेजसी अनुष्णाशीतत्वात् । नविभुचतु
ष्टयं सर्वत्रोपलब्धिप्रसंगात् ॥ नमनः परमाणुस्पर्शस्यातींद्रियत्वात् ॥ नविभुचतुष्टये ॥४॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सर्वदेशावच्छिन्नसंयोगात् । न मनःपरमाणुस्पर्शोऽस्पर्शवतीन्द्रियत्वात् । नस्माद्यः । प्रतीयमा
नस्पर्शाश्रयः स वायुः । ननु वायुः प्रत्यक्षः । प्रत्यक्षस्पर्शाश्रयत्वात् । घटवदिति चेन्न ॥
उद्भूतरूपवत्त्वस्योपाधित्वात् । यत्र द्रव्यत्वे सति बहिरिन्द्रियप्रत्यक्षत्वं तत्रोद्भूतरूपवत्त्व
मिति साध्यव्यापकत्वं । पक्षे साधनाव्यापकत्वं । न चैवं तप्तवारिस्थतेजसोऽप्रत्यक्षत्वाप
त्तिः । इष्टत्वात् । तस्मान्नरूपरहितत्वाद्वायुरप्रत्यक्षः । इदानीं कार्यरूपपृथिव्यादिचतुष्ट
यस्योत्पत्तिविनाशक्रमः कथ्यते । ईश्वरस्य चिकीर्षावशात् परमाणुषु क्रिया
उत्पद्यते । ततः परमाणुद्वयसंयोगे सति द्व्यणुकमुत्पद्यते । त्रिभिर्द्व्यणुकैस्त्र्यणुकं । एवं
चतुरणुकादिक्रमेण महापृथिवी । महत्यः आपः । महत्तेजः । महान्वायुरुत्पद्यते । एवमु
त्पन्नस्य कार्यद्रव्यस्य संजिहीर्षावशात् क्रियया परमाणुद्वयविभागे सति द्व्यणुक
नाशः ॥ ततः त्र्यणुकस्य नाशः ततश्चतुरणुकस्य ॥ इत्येवं पृथिव्यादिनाशः । असमवायिकारण

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥५॥ नाशाद्व्यणुकनाशः। ततस्त्र्यणुकस्य। ततश्चतुरणुकस्य। इत्येवं पृथिव्यादिनाशः। असम-
वायिकारणनाशाद्व्यणुकनाशः। समवायिकारणनाशान्न द्व्यणुकनाश इति संप्रदा-
यः। सर्वत्र असमवायिकारणनाशान् द्रव्यनाश इति नवीनाः। किं पुनः परमाणुसद्भा-
वे प्रमाणं। उच्यते। जालसूर्यमरीचिस्थं सूक्ष्मतमं यद्रजो दृश्यते तत्सावयवं चाक्षुषद्र-
व्यत्वात् पटवत्। त्र्यणुकावयवोपि सावयवः महदारंभकत्वात् तन्तुवत्। यो द्व्यणुकावयवः स ए-
व परमाणुः स च नित्यः। कार्यत्वेनवस्थाप्रसंगात्। सृष्टिप्रलयसद्भावे धाता यथापूर्वमक-
ल्पयदिति श्रुतिप्रमाणं। सर्वकार्यद्रव्यध्वंस अवान्तरप्रलयः। सर्वभावकार्यध्वंसो महा-
प्रलय इति विवेकः। आकाशं लक्षयति। शब्दगुणमिति। ननु आकाशमपि किं पृथि-
व्यादिवन्नानानेत्याह। नत्वेकमिति। भेदे प्रमाणाभावादित्यर्थः। एकत्वादेव सर्वत्रोपल- ॥५॥
ब्धेः विभुत्वं अंगीकर्तव्यमित्यर्थः॥ विभ्विति। सर्वमूर्तद्रव्यसंयोगित्वं। मूर्तत्वं परिच्छिन्न-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

परिमाणवत्त्वं। क्रियावत्त्वं वा। विभुत्वादेव आः। त्मवन्नित्यत्वमित्याह॥ नित्य इति। का
लं लक्षयति। अतीतेति। सर्वाधारः कालः। सर्वकार्यनिमित्तकारणं वा॥ दिशो लक्षणमाह॥
प्राचीति। दिगपि कार्यमात्रे निमित्तकारणं॥ आत्मनो लक्षणमाह॥ ज्ञानेति। नित्यज्ञाना
धिकरणत्वं ईश्वरत्वं। ननु ईश्वरसद्भावे किं प्रमाणं। न तावत्प्रत्यक्षं। नहि बाह्यं वा आंतरं
नाद्यः। अरूपिद्रव्यत्वात्। नान्त्यः। आत्मसुखादिव्यतिरिक्तत्वात्। नाप्यनुमानं। लिंगा
भावादिति चेन्न। अंकुरादिकं कर्तृजन्यं। कार्यत्वात्॥ घटवदित्यनुमानस्य प्रमाणत्वात्॥
उपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वं कर्तृत्वं॥ उपादानं समवायिकारणं। स
कलपरमाण्वादिसूक्ष्मदर्शित्वात्सर्वज्ञत्वं॥ प[illegible]तः। सर्वविदित्यागमोपि तत्र प्रमाणं
जीवस्य लक्षणमाह॥ जीव इति। सुखादिके जीवलक्षणं। ननु मनुष्योहं ब्राह्मणोहं इ
त्यादौ सर्वत्राहं प्रत्यये शरीरस्यैव विषयत्वात्॥ शरीरमेवात्मेति चेन्न। करपादा

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥ द्वी ॥

दिनाशे शरीरनाशात् । आत्मनोऽपि नाशप्रसंगात् । नापि इंद्रियाणां आत्मत्वं । योऽहं घटम
द्राक्षं सोऽहमिदानीं स्पृशामीत्यनुसंधानाभावप्रसंगात् । अन्यानुभूते अन्यस्यानुसं
धानायोगात् । तस्माद्देहेंद्रियव्यतिरिक्तो जीवः । सुखदुःखादिवैचित्र्यात् प्रतिशरीरंभि
न्नः स च न परमाणुः । शरीरव्यापिसुखाद्यनुपलब्धिप्रसंगात् । मध्यमपरिमाणः । तथा न ४
सत्यनित्यत्वप्रसंगेन कृतनाशाकृताभ्यागमप्रसंगात् । तस्मान्नित्यो विभुर्जीवः । मनसो
लक्षणमाह । सुखेति । स्पर्शरहितत्वे सति क्रियावत्त्वं मनसो लक्षणं ॥ मनो विभज
ते नवेति । एकैकस्यात्मनः एकैकं मन इत्यात्मनामनेकत्वान्मनसोऽप्यनेकत्वमित्यर्थः ॥
परमाणुरूपमिति । मध्यमपरिमाणत्वेऽनित्यत्वप्रसंगात् । इत्यर्थः । ननु मनो विभुः स्प
र्शरहितद्रव्यत्वात् । आकाशादिवदिति चेन्न । मनसो विभुत्वे आत्ममनःसंयोगस्या ॥ द्वी ॥
समवायिकारणस्याभावात् । ज्ञानानुपपत्तिप्रसंगात् । न च विभुद्वयस्य संयोगोऽस्ति

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

निवार्य । तत्संयोगस्य नित्यत्वेन सुषुप्त्यभावप्रसंगात् ॥ पुरीतति व्यतिरिक्तप्रदेशा
त्मनः संयोगस्य सर्वदा विद्यमानत्वात् । अणुत्वे तु यदा मनः पुरीततिं प्रविशति तदा
सुषुप्तिः ॥ यदा निःसरति तदा ज्ञानोत्पत्तिरित्यणुत्वसिद्धिः ॥ रूपं लक्षयति चक्षुरि
ति ॥ संख्यादावतिव्याप्तिवारणाय मात्रपदं । रूपत्वेऽतिव्याप्तिवारणाय गुणपदं । ननु
अव्याप्यवृत्तिनीलादिसमुदायस्यैव चित्ररूपमिति चेन्न । रूपस्याव्याप्यवृत्तित्वनियमात् ।
ननु चित्रपटेऽवयवरूपस्यैव प्रतीतिरस्त्विति चेन्न । रूपरहितत्वेन पटस्याप्रत्यक्ष
त्वप्रसंगात् । न च रूपवत्समवेतत्वं प्रत्यक्षत्वप्रयोजकं गौरवात् । तस्मात्प्रत्यक्ष
त्वानुपपत्त्या चित्ररूपसिद्धिः ॥ रसं लक्षयति रसनेति ॥ रसत्वेऽतिव्याप्तिवा
रणाय गुणपदं । रसस्याश्रयमाह पृथिवीति ॥ आश्रयं विभज्य दर्शयति ॥ पृथि

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥७॥ ति।पृथिव्यां इति। गंधवत्त्वस्याति। प्राप्नोति। गंधवत्त्वे अतिव्याप्तिवारणाय गुणपदं॥
स्पर्शवत्त्वस्याति। त्वगिति स्पर्शवत्त्वे अतिव्याप्तिवारणाय गुणपदं। संयोगादावति
व्याप्तिवारणाय मात्रपदं। पाकजमिति। पाकस्तेजःसंयोगः। तेन पूर्वरूपं नश्यति
रूपांतरं उत्पद्यते इत्यर्थः। अत्र परमाणुष्वेव पाकः॥ न द्व्यणुकादौ। आपाकनिक्षि
प्तघटे परमाणुषु रूपांतरोत्पत्तौ श्यामघटनाशेन पुनर्द्व्यणुकादिक्रमेण रक्तघ
टोत्पत्तिः। तत्र परमाणवः समवायिकारणं। तेजःसंयोगः असमवायिकारणं
अदृष्टादिकं निमित्तकारणं। द्व्यणुकादिरूपे कारणरूपं असमवायिकारणमि
ति पीलुपाकवादिनो वैशेषिकाः॥ पूर्वघटस्य नाशं विनैवावयविन्यवयवेषु प ॥७॥
रमाणुपर्यंतेषुयुगपद्रूपांतरोत्पत्तिरिति पीठरपाकवादिनो नैयायिकाः॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अत एव पार्थिवपरमाणुरूपादिकमनित्यमित्यर्थः॥ रूपादिचतुष्टयमुद्भूतं प्रत्य
क्षं तदुद्भूतं। प्रत्यक्षं न तदनुद्भूतं उद्भूतत्वं प्रत्यक्षप्रयोजको धर्मः॥ तदभावः अनुद्भूतत्वं। संख्यां
लक्षयति॥ एकेति॥ परिमाणं लक्षयति। मानेति। परिमाणं विभजते। अण्विति॥ भा
वप्रधानो निर्देशः॥ अणुत्वं महत्त्वं दीर्घत्वं ह्रस्वत्वं चेत्यर्थः। पृथक्त्वं लक्षयति। पृथगिति
इदमस्मात् पृथगिति व्यवहारकारणमित्यर्थः॥ संयोगं लक्षयति। संयुक्तेति॥ इमौ
संयुक्ताविति व्यवहारहेतुरित्यर्थः॥ संख्यादिलक्षणेषु सर्वत्र दिक्कालादावतिव्या
प्तिवारणाय असाधारणेति॥ संयोगो द्विविधः॥ कर्मजः संयोगजश्च॥ आद्यो हस्त
क्रियया पुस्तकसंयोगः॥ द्वितीयो हस्तपुस्तकसंयोगात् कायपुस्तकसंयोगः॥ अव्या
प्यवृत्तिः संयोगः॥ स्वात्यन्ताभावसमानाधिकरणत्वमव्याप्यवृत्तित्वं॥ विभागं ल

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

लक्षयति। संयोगेति। कालादावतिव्याप्तिवारणाय गुण इति। रूपादावतिव्याप्तिवारणा
य संयोगनाशक इति। विभागोपि कर्मजो विभागजश्च। आद्यो हस्तपुस्तकविभागः
द्वितीयः कायपुस्तकविभागः॥ परत्वापरत्वयोः लक्षणमाह। परापरेति पर
व्यवहारकारणं परत्वं। अपरव्यवहारकारणं अपरत्वमिति सर्थः। विभजते। ते
द्विविधे इति। दिक्कृतयोरुदाहरणमाह। दूरस्थ इति। कालकृते उदाहरति।
ज्येष्ठ इति। गुरुत्वं लक्षयति। आद्येति। द्वितीयादिपतनस्य वेगासमवायिकारण
त्वात् वेगेतिव्याप्तिवारणाय आद्येति। द्रवत्वं लक्षयति। स्यंदनेति। सीसकसुव
र्णे तेजःसंयोगजन्यं नैमित्तिकं। तद्भिन्नं सांसिद्धिकं। पृथिव्यां नैमित्तिकमुदा ॥२॥
हरति। घृतादाविति। तेजसि तदाह। सुवर्णादाविति। स्नेहं लक्षयति। चूर्णेति

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कालादावतिव्याप्तिवारणाय गुण इति। रूपादावतिव्याप्तिवारणाय पिंडीभावेति। शब्दल
क्षयवर्तिश्रोत्रेति। शब्दत्वस्यातिव्याप्तिवारणाय गुण इति।। रूपादावतिव्याप्तिवारणाय श्रोत्रेति
शब्दस्त्रिविधः। संयोगजो विभागजः शब्दजश्चेति।। तत्राद्यः भेरीदण्डसंयोगजन्यः। द्वितीयो वंशे
पाट्यमाने दलद्वयविभागजन्यश्चटचटाशब्दः। भेर्यादिदेशमारभ्य श्रोत्रपर्यन्तं द्वितीयादिशब्दाः
शब्दजाः। बुद्धेर्लक्षणमाह। बुद्धीरिति। जानामीत्यनुव्यवसायगम्यमानत्वमेव लक्षणम्। विस
र्गः। बुद्धिं विभजते। सेति।। स्मृतेर्लक्षणमाह।। संस्कारेति।। भावनाख्यः संस्कारः। संस्कार
ध्वंसोऽतिव्याप्तिवारणाय ज्ञानमिति।। घटादिप्रत्यक्षेऽतिव्याप्तिवारणाय संस्कारजन्यमिति।।
प्रत्यभिज्ञायामतिव्याप्तिवारणाय [illegible] मात्रेति। अनुभवं लक्षयति।। तद्भिन्नमिति।। स्मृ
तिभिन्नं ज्ञानं अनुभव इत्यर्थः।। अनुभवं विभजते।। स द्विविधेति। यथार्थानुभवस्य लक्षणमा
ह।। तद्वतीति। ननु घटे घटत्वमिति प्रमायामव्याप्तिः। घटत्वे घटाभावादिति चेन्न। तत्र यत्संबंधो

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

॥न.दी॥
॥८॥

क्षितत्वेनतत्संबंधानु। भवइत्यर्थः॥ घटे [illegible]पि घटसंबंधोस्तीतिनाव्याप्तिः सिद्धेति। यथार्थोनु। भ
वश्चशास्त्रेप्रमेत्युच्यतइत्यर्थः। अप्रमांलक्षयति। तदभाववती[illegible]ति। ननु इदं संयोगीति। प्रमा
यामतिव्याप्तिरिति चेन्न। यदवच्छेदेनयत्संबंधाभावस्तदवच्छेदेनतत्संबंधज्ञानस्यविवक्षि
तत्वात्। संयोगाभावावच्छेदेनसंयोगज्ञानस्यभ्रमत्वात्। संयोगावच्छेदेनसंयोगसंबंधस्यस
त्वान्नातिव्याप्तिः। यथार्थोनुभवं विभजते। यथार्थेति। प्रसंगात्प्रमाणं विभजते। तत्करण
मिति। प्रमाकरणमित्यर्थः। प्रमाकरणं प्रमाणमितिप्रमाणसामान्यलक्षणं। करणलक्ष
णमाह। असाधारणेति। साधारणकारणं दिक्कालादि। अतिव्याप्तिवारणाय असाधार
णेति। कारणलक्षणमाह। कार्येति। पूर्ववृत्तिकारणमित्युक्ते रासभादौ अतिव्याप्तिस्यादतो
नियतेति॥ तावन्मात्रे कार्ये अतिव्याप्तिः। अतः पूर्ववृत्तीति। ननु तंतुरूपमपि पटं प्रतिकारणं
स्यादितिचेन्न। अनन्यथासिद्धत्वे सतीतिविशेषणेन। अनन्यथासिद्धत्वं अन्यथासिद्धिवि ॥धि॥

CC-0. Digitized by eGangotri and MIDF- Delhi

रहः। अन्यथासिद्धिश्च त्रिविधा॥ येन सहैव यस्य यं प्रति पूर्ववृत्तित्वमवगम्यते तं तेनान्यथासि
द्धं। यथा तंतुना तंतुरूपं तंतुत्वं च पटं प्रति। अन्यं प्रति पूर्ववृत्तित्वे ज्ञाते एव यस्य यं प्रति पूर्ववृत्ति
त्वमवगम्यते तं प्रति तदन्यथासिद्धं। यथा शब्दं प्रति पूर्ववृत्तित्वे ज्ञाते एव पटं प्रति आकाशस्य। अन्यत्र
क्लृप्तपूर्ववर्त्तिन एव कार्यसंभवे तत्सहभूतमन्यथासिद्धं। यथा पाकजस्थले गंधं प्रति रूपप्राग
भावस्य। एवं च अनन्यथासिद्धनियतपूर्ववृत्तित्वं कारणत्वं। कार्यलक्षणमाह॥ कार्यमिति।
कारणं विभजते। कारणमिति॥ समवायिकारणलक्षणमाह॥ यत्समवेतमिति॥ यस्मिन्सम
वेतमित्यर्थः॥ असमवायिकारणं लक्षयति कार्येणेति। कार्येणेत्येनदुदाहरति॥ तंतुसंयोग
इति॥ कार्येण पटेन सह एकस्मिन् तंतौ समवेतत्वात् तंतुसंयोगः पटस्यासमवायिकारण
मित्यर्थः। कारणेन सहेत्येनदुदाहरति॥ तंतुरूपमिति कारणेन पटेन सह एकस्मिन् तंतौ स
मवेतत्वात्॥ तंतुरूपं पटरूपस्यासमवायिकारणमित्यर्थः॥ निमित्तकारणं लक्षयति॥ तदुभ

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

||१०|| येति | समवाय्यसमवायिभिन्नं कारणं निमित्तकारणमित्यर्थः | कारणलक्षणमुपसंहरति ||
तदेतदिति | प्रत्यक्षलक्षणमाह | तत्रेति | प्रमाणचतुष्टयमध्य इत्यर्थः | प्रत्यक्षज्ञानस्य लक्षणमा
ह | इन्द्रियं चक्षुरादिकं | अर्थो घटादिः | तयोः सन्निकर्षः संयोगादिः | तज्जन्यं ज्ञानमित्यर्थः | निर्विक
ल्पकस्य लक्षणमाह | निःप्रकारकमिति | विशेष्यविशेषणसंबंधानवगाहिज्ञानमित्यर्थः | ननु नि
र्विकल्पके किं प्रमाणमिति चेन्न | गौरिति विशिष्टज्ञानं विशेषणज्ञानजन्यं विशिष्टज्ञानत्वात् ||
दण्डीति ज्ञानवदित्यनुमानस्य प्रमाणत्वात् | विशेषणज्ञानस्यापि सविकल्पकत्वेऽनवस्थाप्र
संगान् निर्विकल्पकसिद्धिः | सविकल्पकलक्षणमाह | सप्रकारकमिति | नामजात्यादिविशेष
षणविशेष्यसंबंधावगाहिज्ञानमित्यर्थः | सविकल्पकमुदाहरति | यथेति | इन्द्रियार्थसन्नि
कर्षं विभजते | प्रत्यक्षेति | संयोगसन्निकर्षमुदाहरति चक्षुषेति | द्रव्यप्रत्यक्षे सर्वत्र संयोगः ||११||
सन्निकर्ष इत्यर्थः || आत्मा मनसा संयुज्यते | मन इन्द्रियेण | इन्द्रियमर्थेन ततः प्रत्यक्षज्ञानमु

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सघते। संयुक्तसमवायमुदाहरति। घटरूपेति। नत्रयुक्तिमाह। चक्षुःसंयुक्तरीति। संयुक्त
समवेतेनसमवायमुदाहरति। रूपत्वेति। समवायमुदाहरति। श्रोत्रेणेति। नतुपपादयति।
कर्णेति। नतु इतरस्यास्य कथं श्रोत्रसंबंध इति चेन्न। वीचीतरंगन्यायेन कदंबमुकुलन्या
येन वा शब्दान्तरोत्पत्तिक्रमेण श्रोत्रदेशे जातस्य श्रोत्रसंबंधात् प्रत्यक्षत्वसंभवात्। समवे
तसमवायमुदाहरति। शब्दत्वेति। विशेषणविशेष्यभावमुदाहरति। अभावेति। नतुपपाद
यति। घटाभाववदिति। भूतले घटो नास्तीत्यत्राऽभावस्य विशेषणत्वं द्रष्टव्यं। एतेनानुप
द्वि ४ लब्धेः प्रमाणान्तरत्वं निरस्तं। यत्र घटोऽभविष्यत्तर्हि भूतलमिवाद्रक्ष्यत। दर्शनाभावान्ना
स्तीति तर्कितप्रतियोगिसत्वविरोध्यनुपलब्धिसहकृतेनेन्द्रियेणैवाभावज्ञानोपपत्तेरनु
स्व ३ पलब्धेः प्रमाणान्तरत्वासंभवात्। अधिकरणज्ञानार्थमपेक्षणीयस्येन्द्रियस्यैव करणत्वो
पपत्तावनुपलब्धेः करणत्वस्यायुक्तत्वात्। विशेषणविशेष्यभावो विशेषणविशेष्यस्वरूपमे

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥११॥ व नास्ति रिक्तः संबंधः। प्रसक्तज्ञानमुपसंहरन्नस्यकारणमाह। एवमिति। असाधारणत्वा कार
दि इदं प्रसक्तज्ञानकरणमित्यर्थः। प्रसक्तमुपसंहरति तस्मादिति। अनुमानं लक्षयति॥
अनुमितिकरणमिति। अनुमितेर्लक्षणमाह। परामर्शेति। ननु संशयोत्तरप्रत्यक्षेऽतिव्या
प्तिः स्थाणुपुरुषसंशयानन्तरं पुरुषत्वव्याप्यकरादिमानयमिति परामर्शे सति पुरुष एवेति
प्रत्यक्षजननात्। न चैनत्रानुमितिरेवेति वाच्यं। पुरुषं साक्षात्करोमीत्यनुव्यवसायविरोधा
दिति चेन्न। पक्षतासहकृतपरामर्शजन्यत्वस्य विवक्षितत्वात्। सिषाधयिषाविरहसहकृ
तसिद्ध्यभावः पक्षता। साध्यसिद्धिरनुमितिप्रतिबंधिका। सिद्धिसत्वेपि अनुमिनुयामीतीच्छा
यामनुमितिदर्शनात्। सिषाधयिषोत्तेजिका। ननु तत्रोत्तेजकाभावविशि
ष्टमण्यभावस्य दाहकारणत्वा वत्। सिषाधयिषाविरहसहकृतसिद्ध्यभावत्वं गप्रसंगात् ॥११॥
सारणस्तर्क्कः। व्यभिचारशंकानिवर्तकः। ननु सकलवह्निधूमयोः संनिकर्षाभावात्कथं व्या

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भियस्य इति वेद्यं। धूमत्ववह्नित्वरूपसामान्यप्रत्यासत्त्या सकलधूमयोः सन्निकर्षाभावात्॥
कथं व्याप्तिग्रहः इति चेन्न वह्निज्ञानसंभवात्। तस्मादिति। लिङ्गपरामर्शादिसर्वः। परार्था-
नुमानमाह। यत्त्विति। यत्तु स्वपरार्थानुमानमिति नच्छेदेनान्वयः॥ पंचावयववाक्य-
मुदाहरति। यथेति। अवयवस्वरूपमाह। प्रतिज्ञेति॥ उदाहरणवाक्ये प्रतिज्ञाविशेषमाह॥
पर्वतो वह्निमानिति। साध्यवत्तया पक्षवचनं प्रतिज्ञा॥ पंचम्यन्तं लिङ्गप्रतिपादकं हेतुः॥ व्या-
प्तिप्रतिपादकं उदाहरणं। पक्षधर्मताज्ञानार्थं उपनयः॥ हेतुसाध्यवत्तया पक्षप्रतिपा-
दकं वचनं। पक्षज्ञानं प्रतिज्ञाप्रयोजनं॥ लिङ्गज्ञानं हेतुप्रयोजनं व्याप्तिज्ञानं उदाहरण-
पक्षधर्मताज्ञानं उपनयप्रयोजनं। अबाधितत्वादिकं हेतुः व्याप्तिप्रतिपादकं उदाह-
ग॰१२ रणं। निगमनप्रयोजनं। अनुमितिकरणमाह। स्वार्थेति। ननु व्याप्तिस्मृतिपक्षध-
र्मताज्ञानाभ्यामेवानुमितिसंभवे विशिष्टपरामर्शः किमर्थं अङ्गीकर्तव्य इति चेन्न। वह्निव्या-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥१२॥ ष्यवानयमिति शाब्दपरामर्शस्थले परामर्शस्यावश्यकतया लाघवेन सर्वत्र परामर्शस्यैव
कारणत्वात्। लिंगं न करणं। अतीतादौ व्यभिचारात्। व्यापारवत्कारणं करणमिति॥
परामर्शद्वारा व्याप्तिज्ञानं करणं। तज्जन्यत्वे सति तज्जन्यजनको व्यापारः। अनुमा
नमुपसंहरति। तस्मादिति। लिंगं विभजते। लिंगमिति। अन्वयव्यतिरेकि लक्षयति॥
अन्वयेति। हेतुसाध्ययोर्व्याप्तिरन्वयव्याप्तिः। तदभावयोर्व्याप्तिर्व्यतिरेकव्याप्तिः। केवला
न्वयिनो लक्षणमाह। अन्वयेति। केवलान्वयिसाध्यकं केवलान्वयि। असंताभावाप्रतियो
गित्वं केवलान्वयित्वं। ईश्वरप्रमाविषयत्वं सर्वपदार्थाभिधेयत्वं च सर्वत्रास्तीति। व्यतिरेका
भावः। व्यतिरेकिणमुदाहरति। पृथिवीति। ननु तदभेदः प्रसिद्धो न वा। आद्ये यत्र प्रसिद्धस्तत्र हे
तुसत्त्वे अन्वयित्वं। असत्त्वे असाधारण्यं। द्वितीये। साध्यज्ञानाभावात् व्यतिरेकव्याप्तिज्ञान ॥१२॥
स्यैमपि न स्यादिति चेन्न॥ जलादित्रयोदशान्योन्याभावानां त्रयोदशसु प्रत्येकं प्रसिद्धानां मेल

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नेऽपि विद्यां साध्यते। न मोदशत्वावच्छिन्नसाध्यस्य एकाधिकरणवृत्तित्वाभावान्नान्वयित्वा
साधारणेप्रसंगेकाधिकरणवृत्तित्वासाध्यविशिष्टात्तुमितिः। व्यतिरेकव्याप्तिनिरूपणं वेति
। पक्षलक्षणमाह। संदिग्धेति। ननु श्रवणानंतरमाविमनस्थले ऽव्याप्तिः।। तत्र वेदवाक्येरात्म
नो निश्चितत्वेन संदेहाभावात्। किंच पक्षस्यैपि वह्ने पत्रेऽव्याप्तानुमितिः तत्राव्याप्तिरिति चेन्न.
उक्तपक्षताश्रयत्वस्य लक्षणत्वात्।। सपक्षलक्षणमाह। निश्चितेति। विपक्षलक्षणमाह।। नि
श्चितेति।। एवं सद्धेतुं निरूप्य असद्धेतुं निरूपयितुं विभजते।। सव्यभिचारेति। अनुमितिप्र
तिबंधकयथार्थज्ञानविषयत्वं हेत्वाभासत्वं।। व्यभिचारं विभजते। सव्येति त्रिविध इति। साधारणं
लक्षयति। तत्रेति।। उदाहरति नयेति।। असाधारणं लक्षयति। सर्वेति। अनुपसंहारिणो
लक्षणमाह। अन्वयेति। विरुद्धं लक्षयति। साध्येति। सत्प्रतिपक्षं लक्षयति। यस्येति।।
असिद्धं विभजते। असिद्ध इति। आश्रयासिद्धमुदाहरति। गगनेति। स्वरूपासिद्धमुदाहर

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

॥नि.दी.१॥ + प्रागभावो विनाशी प्रमेयत्वात् ५

CC-0. Digitized by eGangotri and MIDF- Delhi

॥१३॥ ति॥ शाह इति॥ व्याप्यत्वासिद्धस्य लक्षणमाह॥ सोपाधिक इति। उपाधिलक्षणमाह। साध्येति
उपाधिश्चतुर्विधः। केवलसाध्यव्यापकः। पक्षधर्मनावच्छिन्नसाध्यव्यापकः साधनावच्छिन्न
साध्यव्यापकः। उदासीनधर्मावच्छिन्नसाध्यव्यापकश्चेति। आद्यः आर्द्रेन्धनसंयोगः। द्वितीयो
यथा। वायुः प्रत्यक्षः प्रमेयत्वात्। इत्यत्र बहिर्द्रव्यत्वावच्छिन्नप्रत्यक्षत्वव्यापकं उद्भूतरूपत्वं। तृ
प्रमेय ~~...~~त्वात् ५ तीयो यथा प्रागभावो विनाशी जन्यत्वात्। इत्यत्र जन्यत्वावच्छिन्नानित्यत्वव्यापकं भावत्वं। बाधितस्य
लक्षणमाह। यस्येति। अत्र बाधस्य ग्राह्याभावनिश्चयत्वेन सत्प्रतिपक्षस्य विरोधिज्ञानसा
मग्रीत्वेन साक्षाद्धेतुमितिप्रतिबंधकत्वे इतरेषां परामर्शप्रतिबंधकत्वं। तत्रापि साधारण
स्य व्यभिचाराभावतया विरुद्धस्य समानाधिकरण्याभावतया। व्याप्यत्वासिद्धस्य विशिष्टव्याप्यत
द्भावतया। असाधारणानुपसंहारिणोः व्याप्तिसंशयाधायकत्वेन च व्याप्तिज्ञानप्रतिबंधक ॥१३॥
त्वं। आश्रयासिद्धस्वरूपासिद्धयोः पक्षधर्मताज्ञानप्रतिबंधकत्वं। उपाधिस्तु व्यभिचारज्ञान

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

द्वाराव्याप्तिज्ञानप्रतिबंधकः॥ सिद्धसाधनं तु पक्षधर्मता विघटकतया आश्रयासिद्धं न भवति
निग्रहस्थानांतरमिति नवीनाः॥ उपमानं लक्षयति॥ उपमितीति। शाब्दं लक्षयति। आप्तेति
पदलक्षणमाह। शक्तिमिति। अर्थस्मृत्यनुकूलः पदपदार्थसंबंधः शक्तिः। सा च पदार्थांतरमिति
मीमांसकाः। तन्निरासार्थमाह। अस्मादिति। डित्थादीनामिव घटादीनामपि संकेतेन एव शक्तिः॥
ननु पदार्थांतरमिति सर्व्वः। गवादिपदानां जातावेव शक्तिः। विशेषणतया जातेः प्रथममुपस्थि-
तत्वात्। व्यक्तिलाभस्तु आक्षेपादिनेति केचित्। तन्न। गामानयेत्यादौ वृद्धव्यवहारे सर्वत्रान-
क्षे ५ यनादेर्व्यक्तावेव संभवेन जातिविशिष्टव्यक्तावेव शक्तिकल्पनात्। शक्तिग्रहश्च वृद्धव्यवहारेण
कुत्रचित्तु बालो गामानयेत्युत्तमवृद्धवाक्यश्रवणानंतरं मध्यमवृद्धस्य प्रवृत्तिमुपलभ्य गवा-
नयनं च दृष्ट्वा मध्यमवृद्धप्रवृत्तिजनकज्ञानस्य अन्वयव्यतिरेकाभ्यां वाक्यजन्यत्वं निश्चित्य स-
अश्वमानय॥ गां बधानेति वाक्यांतरेभ्य आवापोद्वापाभ्यां गोपदस्य गोत्वविशिष्टे शक्तिः अश्व-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥१४॥ ल विशिष्ट इति भुसमघने ॥ ननु सर्वत्र कार्यपरत्वाद्व्यवहारस्य कार्यवाक्ये एव व्युत्पत्तिर्न सिद्धप
द इति चेन्न ॥ कांच्यां त्रिभुवनतिलको भूपतिरित्यादौ सिद्धेपि व्यवहारात् ॥ विकसितपद्मे मधुक
र इत्यादौ प्रसिद्धपदसमभिव्याहारात् सिद्धेपि मधुकरादिव्युत्पत्तिदर्शनाच्च ॥ लक्षणापि शक्य
संबंधः शक्यसंबंधो लक्षणा ॥ गंगायां घोष इत्यत्र गंगापदवाच्यप्रवाहसंबंधाद्वतीरोपस्थितौ ती
रेपि शक्तिर्न कल्पते सैंधवादौ लवणाश्वयोः ॥ परस्परसंबंधाभावान्न शक्तिकल्पनं ॥ लक्षणा त्रिवि ना ना
धा ॥ जहल्लक्षणा ॥ अजहल्लक्षणा जहदजहल्लक्षणा चेति ॥ यत्र वाच्यार्थस्यान्वयाभावः ॥ तत्र जह
ति ॥ यथा ॥ मंचाः क्रोशंतीति ॥ यत्र वाच्यस्यापि अन्वयः ॥ तत्राजहदिति ॥ यथा छत्रिणो गच्छंतीति ॥
यत्र वाच्यैकदेशत्यागेन एकदेशान्वयः ॥ तत्र जहदजहदिति ॥ यथा तत्त्वमसीति ॥ गौणापि लक्षणै
व ॥ लक्ष्यमाणगुणसंबंधरूपा ॥ अग्निर्माणवक इति ॥ व्यंजनापि शक्तिलक्षणांतर्भूता ॥ श ॥१४॥
र्थशक्तिमूला च अनुमानादिना अन्यथासिद्धा तात्पर्यानुपपत्तिर्लक्षणाबीजं ॥ तन्मनीतीच्छ

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

या उच्चरितत्वं नानार्थ्यं। नासमर्थज्ञानं च वाक्यार्थज्ञाने हेतुः॥ नानार्थानुरोधात्। प्रकरणादि
कं नानार्थग्राहकं। द्वा•रमित्यादौ पिधेहीतिशब्दाध्याहारः॥ ननु अर्थज्ञानार्थज्ञानात् शाब्दस्या
र्थमविज्ञाय शब्दाध्याहारासंभवात्। अर्थाध्याहार एव युक्त इति चेन्न॥ पदविशेषजन्यपदा
र्थोपस्थितेः शाब्दज्ञानहेतुत्वात्। अन्यथा पटः कर्मत्वं आनयनं कृतिरित्यत्रापि शाब्दज्ञान
प्रसंगात्। पंकजादिपदेषु योगरूढिः। अवयवशक्तिर्योगः॥ समुदायशक्ती रूढिः॥ नियतप
द्मज्ञानार्थं समुदायशक्तिः। अन्यथा कुमुदेपि प्रयोगप्रसंगः॥ इतरान्विते शक्तिरिति प्राभाक
राः॥ अन्वयस्य वाक्यार्थेन भानसंभवात्। अन्वयांशेपि शक्तिर्न कल्पनीयेति गौतमीयाः॥
आकांक्षेति। आकांक्षादिज्ञानमित्यर्थः। अन्यथा आकांक्षादिभ्रमात् शाब्दभ्रमो न स्यात्। आ
कांक्षां लक्षयति। पदस्येति। योग्यतां लक्षयति। अर्थेति। संनिधिं लक्षयति। पदानामि
ति। अविलंबेन पदार्थोपस्थितिः संनिधिः॥ उच्चारणं तु तदुपयोगितया उक्तं। गौरश्व इति॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श४ ल४

॥१५॥ घटः कर्मत्वं इत्यनाकांक्षोदाहरणं इष्टव्यं । वैदिकस्य विशेषमाह वैदिकमीश्वरोक्तत्वादि
ति । ननु वेदस्यानादित्वात् कथमीश्वरोक्तत्वमिति चेन्न । वेदः पौरुषेयः वाक्यसमूहत्वात् ।
भारतादिवत् । मत्साऽप्रवृत्तारो वेदो न क्षि चेति । न च स्मर्यमाणकर्तृत्वमुपाधिः । गोतमादिभिः
च विशिष्यप॰ परमाणुवेदकर्तृस्मरणेन साधनव्यापकत्वात् । तस्मात्तेस्सन्निधानाच्च योवेदाश्र
जायेतेश्वरेति श्रुतेश्च । ननु वर्णा नित्याः । स एवायं गकार इति प्रत्यभिज्ञावलात् । तथा च क
थं वेदस्यानित्यत्वमिति चेन्न । उत्पन्नो गकारो नष्टो गकार इति प्रतीत्या वर्णानामनित्य
त्वात् । सोयं गकार इति प्रत्यभिज्ञायाः सेयं दीपज्वालेतिवत् जातिसालंबनत्वात् । वर्णानामनि
त्यत्वेप्यानुपूर्वीविशिष्टवाक्यस्यानित्यत्वाच्च । तस्मादीश्वरोक्ता वेदः । मन्वादिस्मृतीनामा
चाराणां च वेदमूलकतया प्रामाण्यम् । स्मृतिमूलवाक्यानां इदानीमनध्ययनात्तन्मूलभू ॥१५॥
ताकाचिच्छाखोच्छिन्नेति कल्पते । ननु पठ्यमानवेदवाक्योत्सादस्य कल्पयितुमशक्यतया

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विप्रकीर्णवाहस्याद्युक्तत्वान्निसानुमेयवेदे । मूलमिति चेन्न । तथापि वर्णानुपूर्वीज्ञा
नानामभावेन बोधकत्वासंभवात् । नन्वेतानि पदानि स्मारितार्थसंसर्गवन्ति । आकांक्षादिमत्पद
कदंबकत्वात् । मद्वाक्यवत् । इत्यनुमानादेव संसर्गज्ञानसंभवात् । शब्दो न प्रमाणान्तरमिति
चेन्न । अनुमितिसापेक्षया शाब्दज्ञानस्य विलक्षणत्वाद् शाब्दं समीत्यनुव्यवसायसाक्षिकस्य संभ
वत्वात् । ननु अर्थापत्तिरपि प्रमाणमस्ति । पीनो देवदत्तो दिवा न भुंक्ते इति दृष्टे श्रुते वा पीन
त्वान्यथानुपपत्त्या । रात्रिभोजनं । अर्थापत्त्या कल्प्यते । इति चेन्न । देवदत्तो रात्रौ भुंक्ते दिवाभुंजा
नत्वे सति पीनत्वात् । इत्यनुमानान् रात्रिभोजनस्य सिद्धत्वात् । ज्ञाने पंचाशादि तिसंभवोप्य
नुमानमेव । इह वटे यक्षस्तिष्ठतीत्यैतीह्यमपि अज्ञानमूलकः शब्द एव । चेष्टापि शब्दानुमा
नद्वारा व्यवहारहेतुरिति न मानान्तरं । तस्मात्प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि । ज्ञाना
नां न द्वितीयप्रकारकत्वं स्वतो ग्राह्यं । परतो वेति विचार्यते । अत्र विप्रतिपत्तिः । ज्ञानप्रामाण्यं न

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

॥न.दी.॥

तर

॥१६॥ द्प्रामाण्यग्राहकयावद्[illegible]मास्यनन्तानग्राहकसामग्रीग्राह्यत्वं न वा । इति विधिकोटिः स्वत
स्त्वं निषेधकोटिः परतस्त्वं अनुमानाद्यग्राह्यत्वेन सिद्धसाधनवारणाय यावदिति । इदं ज्ञान
मप्रमेति ज्ञानेन प्रामाण्याग्रहात् । बाधवारणाय प्रामाण्यग्राहकत्वाभावात् स्वतस्त्वेन
स्यात् । अनन्तेति । न हि अप्रामाण्ये अप्रामाण्यग्राहकस्य सर्व्वत्र । उदाहरन्ति स्थले व्यव
सायेऽप्रामाण्यग्राहकस्यापि अनुव्यवसायेन तद्ग्राहकत्वात् स्वतः सिद्धिः । ननु स्वतस्त्वे प्रा
माण्यं गृह्यते यत्र महं जानामीत्यनुव्यवसायेन घटघटत्वयोरिव तत्संबंधस्यापि विषयिक
रणत्वात् । व्यवसायरूपप्रत्यासत्तेस्तुल्यत्वात् । उपरोवर्त्तिनि प्रकारसंबंधस्यैव प्रमात्वपदार्थ
त्वादिति चेन्न स्वतः प्रामाण्यग्रहे जलज्ञाने प्रनामेवेस्वनभ्यासदशायां प्रमात्वसंशयो न स्या
त् । अनुव्यवसायेन प्रामाण्यस्य निश्चितत्वात् । न स्यात् स्वतो ग्राह्यत्वाभावात् परतो ग्राह्यत्वे । न ॥६॥
नाहि । प्रथमं जलज्ञानानन्तरं । प्रवृत्तौ सत्यां जललाभे सति पूर्व्वोत्पन्नजलज्ञानप्रमा । सम

CC-0. Digitized by eGangotri and MIDF- Delhi
Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

र्थेरंनिजनकत्वात्। यन्नैवं तन्नैवं। यथाऽप्रमेति। व्यतिरेकेणाऽप्रमात्वं निश्चीयते। इतीया
दिज्ञानेषु पूर्वज्ञानदृष्टान्तेन तत्तज्जातीयत्वलिंगेनान्वयव्यतिरेकिणा विगृह्यते। प्रमाया
गुणजन्यत्वं उत्सर्गो परतस्त्वं। प्रमासाधारणं कारणं गुणः। अप्रमासाधारणं दोषः। तत्र प्रत
क्षे विशेषणवद्विशेष्यसन्निकर्षो गुणः। अनुमितौ व्यापकवति व्याप्यज्ञानं। उपमितौ यथार्थ
ज्ञानं सादृश्यं। शाब्दज्ञाने यथार्थयोग्यताज्ञानमित्याद्यूहनीयं। पुरोवर्त्तिनि प्रकारभावस्य
व्यवसायेनानुपस्थितत्वात्। अप्रमात्वं परत एव गृह्यते। पित्तादिदोषजन्यत्वादुत्सर्गो
परतस्त्वे। ननु सर्वज्ञानानां यथार्थत्वात्। अयथार्थज्ञानमेव नास्ति। न च न उक्ताविषयं इदं रजत
मिति ज्ञानात् प्रवृत्तिदर्शनात्। अन्यथाख्यातिसिद्धिरिति वाच्यं। रजतस्मृतिपुरोवर्त्तिज्ञाना
भ्यामेव तद्भिन्नसंभवात्। उपस्थितेष्वभेदाग्रहस्यैव सर्वत्र प्रवर्त्तकत्वेन नेदं रजतमित्यादे
अपि प्रसंगाभावादिति चेन्न। समस्तरजतस्थले पुरोवर्त्ति विशेष्यकरजतत्वप्रकारज्ञान

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥१७॥ स्मलाघवेन प्रवृत्तिजनकतया स्मृत्यावपि रजतार्थप्रवृत्तिजनकत्वेन विशिष्टत्वान
स्मैवकल्पनात्। अयथार्थानुभवं विभजते। अयथार्थेति। स्वप्नस्समानसविषयरूपत्वा
न्नानैविध्यविरोधः। संशयलक्षणमाह। एकेति। घटपटाविति समूहालंबनातिव्याप्ति
वारणाय एकेति। घटोऽयमित्याद्यवतिव्याप्तिवारणाय विरुद्धेति। परस्परविरुद्धधर्मत्वेवा
निसत्रातिव्याप्तिवारणाय नानेति। विपर्ययलक्षणमाह। मिथ्येति। तदभाववति तत्प्रकार
कनिश्चय इत्सर्थः॥ तर्कं लक्षयति। व्याप्येति। यद्यपि तर्को विपर्ययेऽन्तर्भवति तथापि प्रमाणा
नुग्राहकत्वात् भेदेन कीर्तनं। स्मृतिं विभजते। स्मृतिरिति। सुखं लक्षयति। सर्वेषामिति। सुख्य
हमित्याद्यनुव्यवसायगम्यसुखत्वादिकमेव लक्षणं। यथाश्रुतं स्वरूपकथनमिति इच्छ्वी
संस्कारं विभजते। संस्कार इति। संस्कारत्वजातिमान् संस्कारः। वेगस्याश्रयमाह। वेग ॥१७॥
इति। वेगत्वजातिमान्वेगः। पृथिव्यादिचतुष्टयमनोवृत्तिरिति भावनां लक्षयति॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अनुभवेति। आत्मादावतिव्याप्तिवारणाय अनुभवेति। अनुभवध्वंसेति। व्याप्तिवारणाय स्मृ
तीति। स्मृतेरपि संस्कारजनकत्वेन नवीनैरन्ते। स्थितिस्थापकं लक्षयति। अन्यथेति। संख्या
दयोऽष्टौ नैमित्तिक इव लग वेग स्थितिस्थापकाः। सामान्यगुणाः। अन्ये रूपादयो विशे
षगुणाः। इत्यविभाजकोपाधिद्वयसामानाधिकरण्यं द्वित्वे जातिमत्त्वे विशेषणं त्वे। कर्म
णो लक्षणमाह। चलनेति। उत्क्षेपणादीनां कार्यमेदमाह शरीरेति। उर्ध्वेति। वक्रनासं गु ४
पादकमाकुंचनं। ऋजुतासंपादकं प्रसारणमित्यर्थः। सामान्यं लक्षयति। नित्यमिति
परमाणुपरिमाणादौ अतिव्याप्तिवारणाय अनेकेति। अनुगतत्वं समवेतत्वेन न
नाभावादावतिव्याप्तिः। विशेषं लक्षयति। नित्येति। समवायं लक्षयति। नित्य इति
संयोगे अतिव्याप्तिवारणाय नित्येति। आकाशादावतिव्याप्तिवारणाय संबंध इति। अ
युतसिद्ध लक्षणमाह। ययोरिति। नीलो घट इति विशिष्टप्रतीतिः। विशेषणविशे

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥१८॥ ष्यसंबंधविषया। विशिष्टप्रत्ययत्वात्॥ इहं डीतिप्रत्ययवत्। इति समवायसिद्धिः। अव
यवावयविनाविति। इह समवायिकारणमवयवः। जन्य इत्यमृवपिवे प्रागभावं
लक्षयति। अनादिरिति। आकाशादावतिव्याप्तिवारणाय सांत इति। घटादाव
तिव्याप्तिवारणाय अनादिरिति। प्रतियोगिसमवायिकारणवृत्तिः प्रतियोगिज
नको भविष्यतीति व्यवहारहेतुः प्रागभावः। ध्वंसं लक्षयति। सादिरिति। घटादाव
तिव्याप्तिवारणायानन्त इति। आकाशादावतिव्याप्तिवारणाय सादिरिति। प्रतियो
गिजन्यः प्रतियोगिसमवायिवृत्तिर्ध्वस्तव्यवहारहेतुर्ध्वंसः। अत्यंताभावं लक्षयति
त्रैकालिक इति। अन्योन्याभावेऽतिव्याप्तिवारणाय संसर्गाभावावच्छिन्नेति। ध्वंसप्राग
भावयोरतिव्याप्तिवारणाय त्रैकालिके ति। अन्योन्याभावं लक्षयति। तादात्म्येति॥ ॥१८॥
प्रतियोगितावच्छेदकमारोप्य संसर्गभेदाद्वैकप्रतियोगिकयोरसंनाभावान्योन्या

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भावयोर्वृत्ते। केवलघटत्वावच्छिन्नाभाव इति। इदं द्वयाभाव इति प्रतीतिसाक्षिविशिष्टाभावः ॥ एकसत्त्वे द्वौ
न स्त इति प्रतीतिसाक्षिद्वित्वावच्छिन्नाभावः संयोगसंबंधेन घटवति समवायसंबंधेन घटाभावः ॥
न तु द्वित्वाभावाद्धटत्वावच्छिन्नप्रतियोगिताकसामान्याभावश्चातिरिक्तः ॥ एवमन्योन्याभावो
पि घटत्वावच्छिन्नपटो नास्तीति व्यधिकरणधर्मावच्छिन्नाभावो नांगीक्रियते । पटे घटो ना
स्तीति तस्यार्थः ॥ अतिरिक्तत्वे स केवलान्वयी । सामयिकाभावो संताभाव एव समयवि
शेषे प्रतीयमानः । घटाभाववति घटानयने संताभावस्यान्यत्र गमनाभावे पि न प्रतीयं
ते ॥ घटापसारणे सति प्रतीतेः । भूतले घटसंयोगप्रागभावध्वंसयोः संताभावप्रतीति
नियामकत्वं कल्प्यते । घटवति तत्संयोगप्रागभावध्वंसयोः सत्त्वात् । अथ संताभावस्यातःप्र
तीतिः । घटापसारणेन संयोगध्वंससत्त्वात्प्रतीतिरिति ॥ केवलाधिकरणादेव नास्ती
ति व्यवहारोपपत्तौ अभावो न पदार्थान्तरमिति गुरुमतं । अभावानंगीकारे केवलस्य

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

।।१८।। निर्वक्तुमशक्यत्वात्। अभावाभावो भाव एव नातिरिक्तः। अनवस्थाप्रसंगात्। ध्वंसप्रागभा
वः प्रागभावध्वंसश्च प्रतियोग्येव अभावाभावोतिरिक्त एव। नतृतीयाभावस्य प्रथमाभा
वस्वरूपत्वात्। नानवस्थेति नवीनाः। ननु प्रमाणप्रमेयसंशयप्रयोजनदृष्टांतसिद्धांता
वयवतर्कनिर्णयवादजल्पवितंडाहेत्वाभासछलजातिनिग्रहस्थानानां तत्वज्ञा
नान्निःश्रेयसाधिगम इति न्यायसूत्रे षोडशपदार्थानामुक्तत्वात्कथं सप्तैवेस
नेत्याह। सर्वेषामिति। सर्वेषां सप्तस्वेवांतर्भाव इत्यर्थः। आत्मशरीरेंद्रियार्थबुद्धिमनः।
प्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयमिति द्वादशविधं प्रमेयं प्रवृत्तिर्धर्माधर्मौ
रागद्वेषमोहा दोषाः। रागः इच्छा। द्वेषो मन्युः। मोहः शरीरादावात्मभ्रमः। प्रेत्यभावो मरणं
फलं भोगः। अपवर्गो मोक्षः। सर्वस्वसमानाधिकरणदुःखप्रागभावासमानकाली ।।१८।।
नदुःखध्वंसः।। प्रयोजनं सुखदुःखहानिश्च। दृष्टांतो महानसादिः।। सामानिकत्वे

CC-0. Digitized by eGangotri and MIDF- Delhi
Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नाभ्युपगतोर्थः सिद्धांतः। निर्णयो निश्चयः। प्रमाणं फलं तत्त्वबुभुत्सोः कथा वादः॥ उभय
साधनवती विजिगीषुकथा जल्पः॥ स्वपक्षस्थापनहीना वितंडा॥ कथा नाम नानावक्तृकपू
र्वोत्तरपक्षवाक्यसंदर्भः॥ अभिप्रायांतरेण प्रयुक्तस्यार्थांतरं कल्पइषणं छलं। अस
दुत्तरं जातिः॥ साधर्म्यवैधर्म्योत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्यप्राप्त्यप्राप्तिप्रसंगप्र
तिदृष्टांतानुत्पत्तिसंशयप्रकरणहेत्वर्थापत्त्यविशेषोपपत्त्युपलब्धिकारणनि
त्यानित्यकार्यसमजातयः वादिनोऽजयहेतुर्निग्रहस्थानं। प्रतिज्ञाहानिः प्रतिज्ञांतरं
प्रतिज्ञाविरोधः। प्रतिज्ञासंन्यासः हेत्वंतरमर्थांतरं निरर्थकं॥ अविज्ञातार्थम् अपथार्थ
कं। अप्राप्तकालं न्यूनं। अधिकं पुनरुक्तमननुभाषणं। अज्ञानमप्रतिक्षेप मतानुज्ञाः॥
पर्यनुयोज्योपेक्षणं निरनुयोज्यानुयोगः। अपसिद्धांतः॥ हेत्वाभासाश्च निग्रहस्थाना
नि शेषं सुगमं। ननु करतलानलसंयोगे सत्यपि दाहाननुत्पत्तेः शक्तिः। पदार्थांतरमि

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥२०॥ निवेशात्।प्रतिबंधकाभावस्य कार्य्यमात्रे कारणत्वेन शंकोत्तरत्रोपगमात्।कारणत्वमे
वशक्तिपदार्थत्वात्।ननु भस्मादिना कांस्यादेःशुद्धिदर्शनात्।आधेयशक्तिरंगीकार्येति
चेन्न।भस्मादिसंयोगसमानकालीनम्लेच्छस्पर्शप्रतियोगिकयावदभावसहित
भस्मादिसंयोगध्वंसस्य शुद्धिपदार्थत्वात्।स्वत्वमपि न पदार्थान्तरं।यथेष्टविनियोगयो
ग्यत्वस्य स्वत्वस्वरूपत्वात्।न तदवच्छेदकं च प्रतिग्रहादिलब्धत्वमेवेति।अथ विधिनिरूप
णम्।प्रवर्त्तकज्ञानविषयो विधिः।नन्वतिपातको निरादिर्वाल्हस
साध्ये प्रवृत्तस्य दर्शनात्।कृतिसाध्यताज्ञानं प्रवर्त्तकं।न च विषभक्षणादौ प्रवृत्तिप्रसं
गः।इष्टसाधनतालिंगकृतिसाध्यताज्ञानस्य कार्य्यत्वे विहितकालजीवित्व
निमित्तज्ञानजन्यस्यैव नित्यनैमित्तिकस्यत्वे प्रवर्त्तकत्वात्।न चाननुगमः।स्वविशेषण॥२१॥
णवत्ताप्रतिसंधानजन्यत्वस्यानुगतत्वादिति गुरवः॥नव्यास्तु॥लाघवेन कृतिसाध्ये

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ष्टसाधनताज्ञानस्यैव चिकीर्षाद्वारा प्रवृत्तिजनकत्वात्। नच निसेसाधनत्वाभावाद्प्रवृ
त्तिप्रसंगः। तत्रापि प्रत्यवायपरिहारस्य पापक्षयं वा फलत्वकल्पनात्। तस्मात्कृतिसाध्येष्टसा
धनत्वमेव लिङर्थः। ननु ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यत्र लिङा स्वर्गसाधनं कार्यं प्र
तीयते। यागस्याशुविनाशिनः कालान्तरभाविस्वर्गसाधनत्वायोगात्। योगस्यापि कार्यं
घ५ अपूर्वमेव लिङर्थः॥ कार्यं कृतिसाध्यं। कृतेः सविषयकत्वात्। विषयाकांक्षायां यागो
विषयत्वेनान्वेति। कस्य कार्यमिति नियोज्याकांक्षायां स्वर्गकामपदं नियोज्यपरत
यान्वेति कार्यबोद्धा नियोज्यः। तेन ज्योतिष्टोमनामकयागविषयं स्वर्गकामस्य कार्यं क४
मिति वाक्यार्थः। संपद्यते वैदिकलिङ्त्वात्। यावज्जीवमग्निहोत्रं जुहुयादिति वाक्ये
अपूर्वमेव वा॰ कल्पनात्। आरोग्यकामो भेषजपानं कुर्यादिति लौकिकलि॰ क्रिय ङः२
याकार्यत्वलक्षणेति चेन्न। यागस्याप्ययोग्यतानिश्चयाभावेन साधनतया प्रतीसनंतरं

थं२ ङ३

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प.३

२१ तन्निर्वाहार्थं श्वाबांतरव्यापारतयाऽपूर्वकल्पनात्। कीर्त्तनादिनानाशा[illegible]श्रुतेर्नयाग
घं सो व्यापारः। नो कश्चु तन्निवर्त्तनात् क्रियायामेव साधनत्वं लिङा बोध्यते इति। लिङ्त्वेनरू
पेण विध्यर्थकत्वं। आख्यातेन [illegible]र्थकत्वं। पचति पाकं करोतीति विवरणदर्शनात्।
किं करोतीति प्रश्ने पचतीत्युत्तरांख्या[illegible]तस्य सलया र्थत्वनिश्चयात्। रथो गच्छतीत्यादौ
दा.४ अनुकूलव्यापारे लक्षणा। देवदत्तेन पच्यते तंडुल इत्यादौ कर्त्तृत्वकर्म्मणोर्नाख्यातार्थ
त्वं। किंतु न कृते कर्त्रादीनामेव तयोराक्षेपादेव लाभः। प्रजयतीत्यादौ धातोरेवैकदेशशक्तिः॥ प्र.५
। उपसर्गाणां द्योतकत्वमेव न तत्र शक्तिरस्ति। पदार्थज्ञानस्य परमप्रयोजनं मोक्षः। न
दू.३ था हि। आत्मा वारे [illegible]ष्टव्यः। श्रोतव्यो मंतव्यो निदिध्यासितव्य इति श्रुत्वा श्रवणादीनां सा
क्षात्कारहेतुत्वबोधनात्। श्रुत्वा देहादिभिन्नस्य णत्म ज्ञाने सत्यपि प्रसंभवानिवृत्तेः॥ ॥ २१ ॥
एतमनुसंधानरूपमननमसाध्यत्वान् मननोपयोगिपदार्थनिरूपणद्वारा शास्त्रस्या

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥२२॥ पि मोक्षोपयोगः। ननु ने नरं श्रवणोपदिष्टयोगविधिना निदिध्यासनेनानेन तत्त्वं नरं देहादि
वि[stain]त्मसाक्षात्कारे सति देहादावहमानहिमभिमानरूपमिथ्याज्ञाननाशे सति दो
लक्ष्या षाभावात् प्रवृत्त्यभावे धर्माधर्मयोरभावाज्जन्माभावे पूर्वधर्माधर्मयोरनुभवेन नाशे चर
णार मदुःखध्वंसलक्षणो मोक्षो जायते। ज्ञानमेव मोक्षसाधनं मिथ्याज्ञाननिवृत्तेः॥ ज्ञानमात्र
सा[stain]ज्ञानमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनायेति साधनान्तरं निषेधात्॥
ध्यात्वा ५ ननु तत्त्वाप्तिहेतुर्विज्ञाने कर्म चोक्तं महामुने इति कर्मणो मोक्षसाधनत्वस्मरणात्। ज्ञानकर्म
णोः समुच्चय इति चेन्न। निःसनेमिन्निकेरेव कुर्वाणो दुरितक्षयं। ज्ञानं च विमलीकुर्वन्नभ्या
सेन च पाचयेत्। अभ्यासासक्तो विज्ञानं केवलं लभते नर इत्यादिना कर्मणो ज्ञानसाधनत्वप्रति
पादनात्। ज्ञानद्वारैव कर्म मोक्षसाधनं न साक्षात्। तस्मात्तत्त्वज्ञानान्मोक्षः परमप्रयोज ॥२२॥
नमिति सर्वं रमणीयं॥ ॥ इति श्रीमदन्नंभट्टोपाध्यायकृते तर्कसंग्रहटीका संपूर्णा॥ ॥ श्री॥

ज्ञार

णार

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

This PDF you are browsing is in a series of several scanned documents containing the personal colleciton of Jagannath Bhattarai ji from Kathmandu, Nepal.

CV:

Jagannath Bhattarai
Date of Birth: 31 December 1960
Place of Birth: Kathmandu, Nepal
Address: Nagarjun (Ramkot), Kathmandu

Educational Qualifications
Bachelor of Science (B.Sc.) – Major in Biology
Master's Degree – Sociology & Anthropology
Shastri (Ongoing) – Balmiki Vidyapeeth

Professional Experience
Government School Teacher (Madhyamik Pratham Shreni)
Taught at Secondary Level (Madhyamik)
Taught at Higher Secondary Level (Uchcha Madhyamik)
Served as Head Teacher
Led academic and administrative development
Strengthened institutional performance and student outcomes

Areas of Interest
Sanskrit Vyakaran
Spiritual & Philosophical Studies
Educational Leadership

Digitization by eGangotri Trust
Funding by MIDF, New Delhi